# Shri Rama Stuti by Brahma

# બ્રહ્મકૃતા શ્રીરામસ્તુતિઃ

## Document Information

Text title : Shri Rama Stuti by Brahma

File name : rAmabrahmastutiH.itx

Category : raama

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 12, 2020

*sanskritdocuments.org*

# Shri Rama Stuti by Brahma

## બ્રહ્મકૃતા શ્રીરામસ્તુતિઃ

તતો હિ દુર્મના રામઃ શ્રુત્વૈવ વદતાં ગિરઃ ।
દધ્યૌ મુહૂર્તં ધર્માત્મા બાષ્પવ્યાકુલલોચનઃ ॥ ૧॥

તતો વૈશ્રવણો રાજા યમશ્ચામિત્રકર્શનઃ ।
સહસ્રાક્ષો મહેન્દ્રશ્ચ વરુણશ્ચ પરન્તપઃ ॥ ૨॥

ષડર્ધનયનઃ શ્રીમાન્ મહાદેવો વૃષધ્વજઃ ।
કર્તા સર્વસ્ય લોકસ્ય બ્રહ્મા બ્રહ્મવિદાં વરઃ ॥ ૩॥

એતે સર્વે સમાગમ્ય વિમાનૈઃ સૂર્યસન્નિભૈઃ ।
આગમ્ય નગરીં લઙ્કામભિજગ્મુશ્ચ રાઘવમ્ ॥ ૪॥

તતઃ સહસ્તાભરણાન્ પ્રગૃહ્ય વિપુલાન્ ભુજાન્ ।
અબ્રુવન્સ્ત્રિદશશ્રેષ્ઠા રાઘવં પ્રાઞ્જલિં સ્થિતમ્ ॥ ૫॥

કર્તા સર્વસ્ય લોકસ્ય શ્રેષ્ઠો જ્ઞાનવતાં પ્રભુઃ (વરઃ) ।
ઉપેક્ષસે કથં સીતાં પતન્તીં હવ્યવાહને ॥ ૬॥

કથં દેવગણશ્રેષ્ઠમાત્માનં નાવબુધ્યસે ।
ઋતધામા વસુઃ પૂર્વં વસૂનાં ત્વં પ્રજાપતિઃ ॥ ૭॥

ત્વં ત્રયાણાં હિ લોકાનામાદિકર્તા સ્વયમ્પ્રભુઃ ।
રુદ્રાણામષ્ટમો રુદ્રઃ સાધ્યાનામપિ (સિ)પઞ્ચમઃ ॥ ૮॥

અશ્વિનૌ ચાપિ તે કર્ણૌ ચન્દ્રસૂર્યૌ ચ ચક્ષુષી ।
અન્તે ચાદૌ ચ લોકાનાં દૃશ્યસે ત્વં પરન્તપ ॥ ૯॥

ઉપેક્ષસે ચ વૈદેહીં માનુષઃ પ્રાકૃતો યથા ।
ઇત્યુક્તો લોકપાલૈસ્તૈઃ સ્વામી લોકસ્ય રાઘવઃ ॥ ૧૦॥

અબ્રવીત્ ત્રિદશશ્રેષ્ઠાન્ રામો ધર્મભૃતાં વરઃ ।
આત્માનં માનુષં મન્યે રામં દશરથાત્મજમ્ ॥ ૧૧॥

યોઽહં યસ્ય યતશ્ચાહં ભગવાન્ પ્ર(તત્)બ્રવીતુ મે ।
ઇતિ બ્રુવાણં કાકુત્સ્થં બ્રહ્મા લોકપિતામહઃ ॥ ૧૨॥

અબ્રવીચ્છૃણુ મે રામ સત્યં સત્યપરાક્રમ ।
ભવાન્નારાયણો દેવઃ શ્રીમાંશ્ચક્રધરો હરિઃ ॥ ૧૩॥

એકશૃઙ્ગો વરાહસ્ત્વં ભૂતભવ્યસપત્નજિત્ ।
અક્ષરં બ્રહ્મ સત્ત્વં ત્વં (સત્યં ચ)ત્વં મધ્યેઽન્તે ચ રાઘવ ॥ ૧૪॥

લોકાનાં ત્વં પરો ધર્મો વિષ્વક્સેનશ્ચતુર્ભુજઃ ।
શાર્ઙ્ગધન્વા હૃષીકેશઃ પુરુષઃ પુરુષોત્તમઃ ॥ ૧૫॥

અજિતઃ ખડ્ગભૃદ્વિષ્ણુઃ કૃષ્ણશ્ચૈવ બૃહદ્બલઃ ।
સેનાનીર્ગ્રામણીશ્ચ ત્વં ત્વં બુદ્ધિસ્ત્વં ક્ષમા દયા ॥ ૧૬॥

પ્રભવશ્ચાપ્યયશ્ચ ત્વમુપેન્દ્રો મધુસૂદનઃ ।
ઇન્દ્રકર્મા મહેન્દ્રસ્ત્વં પદ્મનાભો રથાઙ્ગભૃત્(રણાન્તકૃત્) ॥ ૧૭॥

શરણ્યં શરણં ચ ત્વામાહુર્દિવ્યા મહર્ષયઃ ।
સહસ્રશૃઙ્ગો વેદાત્મા શતજિહ્વો મહર્ષભઃ ॥ ૧૮॥

ત્વં ત્રયાણાં હિ લોકાનામાદિકર્તા સ્વયમ્પ્રભુઃ ।
સિદ્ધાનામપિ સાધ્યાનામાશ્રયશ્ચાસિ પૂર્વજઃ ॥ ૧૯॥

ત્વં યજ્ઞસ્ત્વં વષટ્કારસ્ત્વમોઙ્કારઃ પરન્તપ ।
પ્રભવં નિધનં વા તે ન વિદુઃ કો ભવાનિતિ ॥ ૨૦॥

દૃશ્યસે સર્વભૂતેષુ બ્રાહ્મણેષુ ચ ગોષુ ચ ।
દિક્ષુ સર્વાસુ ગગને પર્વતેષુ વનેષુ ચ ॥ ૨૧॥

સહસ્રચરણઃ શ્રીમાન્ શતશીર્ષઃ સહસ્રદૃક્ ।
ત્વં ધારયસિ ભૂતાનિ વસુધાં ચ સપર્વતામ્ ॥ ૨૨॥

અન્તે પૃથિવ્યાઃ સલિલે દૃશ્યસે ત્વં મહોરગૈઃ ।
ત્રીન્ લોકાન્ ધારયન્ રામ દેવગન્ધર્વદાનવાન્ ॥ ૨૩॥

અહં તે હૃદયં રામ જિહ્વા દેવી સરસ્વતી ।
દેવા ગાત્રેષુ રોમાણિ નિર્મિતા બ્રહ્મણા પ્રભો ॥ ૨૪॥

નિમેષસ્તેઽભવદ્રાત્રિરુન્મેષસ્તેઽભવદ્દિવા ।
સંસ્કારાસ્તેઽભવન્ વેદા ન તદસ્તિ ત્વયા વિના ॥ ૨૫॥

જગત્સર્વં શરીરં તે સ્થૈર્યં તે વસુધાતલમ્ ।
અગ્નિઃ કોપઃ પ્રસાદસ્તે સોમઃ શ્રીવત્સલક્ષણ ॥ ૨૬॥

ત્વયા લોકાઃ સમાક્રાન્તાઃ પુરાણે વિક્રમૈસ્ત્રિભિઃ ।
મહેન્દ્રશ્ચ કૃતો રાજા બલિં બદ્ધ્વા મહાસુરમ્ ॥ ૨૭॥

સીતા લક્ષ્મીર્ભવાન્ વિષ્ણુર્દેવઃ કૃષ્ણઃ પ્રજાપતિઃ ।
વધાર્થં રાવણસ્યેહ પ્રવિષ્ટો માનુષીં તનુમ્ ॥ ૨૮॥

તદિદં નઃ કૃતં કાર્યં ત્વયા ધર્મભૃતાં વર ।
નિહતો રાવણો રામ પ્રવિષ્ટો(પ્રહૃષ્ટો) દિવમાક્રમ ॥ ૨૯॥

અમોઘં બલવીર્યં તે ન તે મોઘઃ પરાક્રમઃ ।
અમોઘં દર્શનં રામ ન ચ મોઘસ્તવ સ્તવઃ ॥ ૩૦॥

અમોઘાસ્તે ભવિષ્યન્તિ ભક્તિમન્તસ્તુ યે જનાઃ ।
યે ત્વાં દેવ ધ્રુવં પ્રાપ્તાઃ પુરાણપુરુષોત્તમમ્ ॥ ૩૧॥

પ્રાપ્નુવન્તિ સદા કામાનિહ લોકે પરત્ર ચ ।
ઇમમાર્ષં સ્તવં નિત્યમિતિહાસં પુરાતનમ્ ।
યે નરાઃ કીર્તયિષ્યન્તિ નાસ્તિ તેષાં પરાભવઃ ॥ ૩૨॥

ઇતિ શ્રીબ્રહ્મકૃતા રામસ્તુતિઃ સમ્પૂર્ણા ।

Proofread by Aruna Narayanan

*Shri Rama Stuti by Brahma*

pdf was typeset on September 12, 2020

Please send corrections to *sanskrit@cheerful.com*